Nirvana Shatakam

निर्वाणषट्कम्

NityaPaath
nityapaath.com/nirvana-shatakam/

SHLOKA · श्लोक

1 मनोबुद्ध्यहङ्कारचित्तानि नाहं
न च श्रोत्रजिह्वे न घ्राणनेत्रे।
न च व्योम भूमिर्न तेजो न वायु-
श्चिदानंदरूपः शिवोऽहं शिवोऽहम्॥

2 न च प्राणसंज्ञो न वै पञ्चवायु-
र्न वा सप्तधातुर्न वा पञ्चकोशः।
न वाक्पाणिपादं न चोपस्थपायू
चिदानन्दरूपः शिवोऽहं शिवोऽहम्॥

3 न मे द्वेषरागौ न मे लोभमोहौ
मदो नैव मे नैव मात्सर्यभावः।
न धर्मो न चार्थो न कामो न मोक्ष-
श्चिदानन्दरूपः शिवोऽहं शिवोऽहम्॥

4 न पुण्यं न पापं न सौख्यं न दुःखं
न मंत्रो न तीर्थं न वेदा न यज्ञाः।
अहं भोजनं नैव भोज्यं न भोक्ता
चिदानन्दरूपः शिवोऽहं शिवोऽहम्॥

5 न मृत्युर्न शङ्का न मे जातिभेदः
पिता नैव मे नैव माता न जन्म।
न बन्धुर्न मित्रं गुरुर्नैव शिष्य-
श्चिदानन्दरूपः शिवोऽहं शिवोऽहम्॥

6 अहं निर्विकल्पी निराकाररूपी
विभुत्वाच्च सर्वत्र सर्वेंद्रियाणाम्।
न चासंगतं नैव मुक्तिर्न ये य-
श्चिदानन्दरूपः शिवोऽहं शिवोऽहम्॥

Text checked against: Brihat Stotra Ratnakar (sachitra, 227 stotras), Khemraj Shrikrishnadas, Shri Venkateshwar Press, Mumbai; reprint February 2020.
Meanings, audio and all scripts at nityapaath.com/nirvana-shatakam/